श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीपार्थसारथिदासेन कृतम्

# ॥ श्रीपद्मावतीदेवीसमेत श्रीनिवाससुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीपद्मावतीदेवीसमेत श्रीनिवाससुप्रभातम् ॥

नमामि पद्मापतिपादपङ्कजं करोमि पद्मापतिपूजनं सदा।
वदामि पद्मापतिनाम सुन्दरं भजामि कल्याणपुराधिपं सदा॥ १ ॥

गोविन्द गोपाल सुरेशवन्द्य दीनार्तिहारिन् भगवन् मुकुन्द।
श्रीनाथ कल्याणपुराधिराज कारुण्यमूर्ते तव सुप्रभातम्॥ २ ॥

सर्वज्ञ सर्वप्रद सर्वशेषिन् स्वामिन् हयग्रीव पतङ्गकेतो।
कंसघ्न कल्याणपुराधिराज कल्याणमूर्ते तव सुप्रभातम्॥ ३ ॥

समाश्रितानामभयप्रदातः सर्वान्तरात्मन् सकलाधिनाथ।
लोकेश कल्याणपुराधिवासिन् अनादिमूर्ते तव सुप्रभातम्॥ ४ ॥

चक्रादिरेखाङ्कितपादपद्म प्रसन्न नारायण देवदेव।
चैद्यघ्न कल्याणपुराधिराज हे विश्वमूर्ते तव सुप्रभातम्॥ ५ ॥

विष्णो हृषीकेश विभो मुरारे श्रीकृष्ण पद्माक्ष हरे नृसिंह।
श्रीराम कल्याणपुराधिराज हे चक्रपाणे तव सुप्रभातम्॥ ६ ॥

वैकुण्ठ दामोदर विश्वगोप्तः भूमीश नीळाप्रिय खड्गपाणे।
लक्ष्मीश कल्याणपुराधिराज हे पूतनारे तव सुप्रभातम्॥ ७ ॥

उपेन्द्र कल्किन् कमठस्वरूप सहस्रबाहो वसुदेवसूनो।
अनन्त कल्याणपुराधिराज हे लोकबन्धो तव सुप्रभातम्॥ ८ ॥

अनन्तकल्याणगुणाभिराम सुवर्णनद्यास्तटनित्यवास।
गोदेश कल्याणपुराधिराज कौन्तेयबन्धो तव सुप्रभातम्॥ ९ ॥

ब्रह्मर्षिरुद्रार्चितपादपद्म गजेन्द्रमोक्षप्रद शेषशायिन्।
पद्मेश कल्याणपुराधिराज शेषाद्रिवासिन् तव सुप्रभातम्॥ १० ॥

www.prapatti.com

त्रिलोकनाथाच्युत कैटभारे यथोक्तकारिन् प्रणवस्वरूप।
काकुत्स्थ कल्याणपुराधिराज चन्द्रार्कचक्षुस्तव सुप्रभातम्॥ ११॥

हे वीर सत्यव्रत पार्थसूत हे पुण्डरीकाक्ष मनोभिराम।
श्रीकान्त कल्याणपुराधिराज कोदण्डपाणे तव सुप्रभातम्॥ १२॥

प्रतप्तचामीकरतुल्यतेजः हेमाब्जदेवीप्रिय शौरिराज।
मधुघ्न कल्याणपुराधिराज सप्ताद्रिवासिन् तव सुप्रभातम्॥ १३॥

सीतासमालिङ्गित सुन्दराङ्ग सूर्यान्वयालङ्कृतिरत्न राम।
खरघ्न कल्याणपुराधिराज हे ताटकारे तव सुप्रभातम्॥ १४॥

श्रीखण्डनक्षेत्रसमीपवासिन् गोवर्द्धनोद्धारक नन्दसूनो।
हे नाथ कल्याणपुराधिराज हे दीनबन्धो तव सुप्रभातम्॥ १५॥

हृत्पद्ममध्ये कृतनित्यवास द्युराजपुत्रीप्रिय मेघवर्ण।
हे शूर कल्याणपुराधिराज हे स्तम्भसूनो तव सुप्रभातम्॥ १६॥

क्षीराब्धिमध्ये श्रितभोगतल्प लक्ष्म्या समासेवितपादपद्म।
हे देव कल्याणपुराधिराज कोट्यर्ककान्ते तव सुप्रभातम्॥ १७॥

पद्मावतीरमण मत्स्य वराहरूपिन् स्वामिन् त्रिविक्रम विभो जितजामदग्न्य।
श्रीरङ्गनाथ मम दशास्यहन्तः कल्याणपत्तनपते तव सुप्रभातम्॥ १८॥

श्रीवेङ्कटेश पुरुषोत्तम शार्ङ्गपाणे वक्षस्स्थकौस्तुभमणे धृतपाञ्चजन्य।
वैडूर्यरत्नमणिमौक्तिकहारधारिन् कल्याणपत्तनपते तव सुप्रभातम्॥ १९॥

प्रभुं शम्पुरीशं विना यो न नाथः सदा शम्पुरीशं भजामि स्मरामि।
हरे शम्पुरीश प्रसीद प्रसीद प्रभो शम्पुरीश प्रयच्छ प्रियं त्वम्॥ २०॥

एतानि कल्याणपुरेश्वरस्य नामानि भक्तप्रियदायकानि।
भक्त्या पठन्तस्सकलार्थसिद्धिं अत्युत्तमं मोक्षपदं भजन्ति॥ २१॥

॥ इति श्रीपद्मावतीदेवीसमेत श्रीनिवाससुप्रभातम् समाप्तम्॥

www.prapatti.com